## BACHELOR OF ARTS EXAMINATION, 2023

(1st Year, 2nd Semester)

## SANSKRIT (Honours)

## COURSE – III

## [ Mahākāvya & Metrics ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

### क–विभागः

१. किरातार्जुनीयमिति महाकाव्यस्य प्रथमसर्गे उपलब्धः वनेचरसंवादः समासतः उपस्थापनीयः। 6

२. अधोनिर्दिष्टयोरे**कस्य** सप्रसङ्गं तात्पर्यं देयम् – 3

क) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

ख) अहो दुरन्ता बलवद्विरोधिता।

३. अधोलिखितेषु प्रश्न**द्वयं** सुरगिरा देवनागर्या लिप्या च समाधेयम् – 3×2=6

क) 'प्रवृत्तिसाराः खलु मादृशां गिरः' – कं प्रति कस्य च इयमुक्तिः? कथं तेन इयमुच्चारिता? 1+2=3

ख) 'विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्' – 'नक्तन्दिवमस्ततन्द्रिणा' इत्यत्र सन्धिविभागः कार्यः। तस्य पौरुषं कथं वितन्यते? संक्षेपेण लिख्यताम्। 1+2=3

ग) 'न बाधतेऽस्य त्रिगणः परस्परम्' – अत्र त्रिगणः इति पदेन के सूच्यन्ते? त्रिगणः परस्परं कथं न बाधते इति संक्षेपेण उच्यताम्। 1+2=3

[ Turn over



### ख–विभागः

४. तपश्चर्याकाले पार्वत्याः जीवनशैलीविषये एकः प्रबन्धो विरच्यताम्। 6

५. अधोनिर्दिष्टयोरे**कस्याः** पङ्क्तेः सप्रसङ्गं तात्पर्यं लिख्यताम् – 3

क) न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते।

ख) क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्।

६. अधःप्रदत्तेषु **चत्वारः** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – 1×4=4

क) पार्वती तपश्चर्यार्थं कुत्र गतवती?

ख) तपसे गौरी किमाच्छादनं गृहीतवती?

ग) तपोवनं पावनं बभूव–इत्यस्य एका युक्तिः दीयताम्।

घ) तपश्चर्याकाले पार्वत्याः पारणाविधिः कः आसीत्?

ङ) पार्वत्याः अपर्णा इति नामकरणं किमर्थम्?

७. निम्नलिखितेषु **चतुर्णां** सुरगिरा पर्यायशब्दो देयः – 0·5×4=2

क) सरागम्,

ख) क्लमम्,

ग) शुचौ,

घ) श्यामिकया,

ङ) सहस्यरात्रीः।